# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा -शास्त्रीप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ५ | गुणा: - ७० |
|---|---|---|
| विषय: - फलितज्यौतिषम् | (C.C.- 1.1.1. Old) | |
| दिनाङ्क: - १९/१२/२०१८ | मुहूर्तचिन्तामणि: । | समय: -०२.०० त: ०५.०० |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितेषु कयोश्चिद् द्वयो: व्याख्यां कुरुत ।** **( ०८ )**

*(१) नेष्टं ग्रहर्क्षे सकलार्धपादग्रासे क्रमात्तर्कगुणेन्दुमासान् ।*
*पूर्वं परस्तादुभयोस्त्रिघस्रा ग्रस्तेऽस्तगे चाभ्युदितेऽर्धखण्डे ॥*

*(२) भद्रातिथी रविजभूतनयार्कवारे द्वीशार्यमाजचरणादितिवह्निवैश्वे ।*
*त्रैपुष्करो भवति मृत्युविनाशवृद्धौ त्रैगुण्यदो द्विगुणकृद्वसुतक्षचान्द्रे ॥*

*(३) क्षिप्राहिमूलेन्दुहरीशवायुभे प्रेतक्रिया स्याज्झषकुम्भगे विधौ ।*
*प्रेतस्य दाहं यमदिग्गमं त्यजेच्छय्यावितानं गृहगोपनादि च ॥*

**प्रश्न: २ कस्याप्येकस्योपरि निबन्धं लिखत ।** **( ०८ )**

*(१) सिंहस्थगुरु: परिहारश्च । (२) नष्टवस्तुप्राप्तौ अन्धादिनक्षत्राणि फलञ्च ।*

**प्रश्न: ३ टिप्पणीं लिखत । ( एकैव )** **( ०२ )**

*(१) दुष्टयोगपरिहार:*

*(२) होमाहुतिविचार:*

**प्रश्न: ४ अतिलघूत्तराणि लेख्यानि । ( द्वयोरेव )** **( ०२ )**

*(१) का: रिक्तातिथय: सन्ति ? (२) गुरुपुष्यामृतयोग: कस्मिन् कार्ये अप्रशस्त: ?*
*(३) कानि ऊर्ध्वमुखनक्षत्राणि सन्ति ? (४) मूलस्यान्तिमपादस्य फलं किम् ?*

**द्वितीयान्विति:**

**प्रश्न: ५ अधोलिखितेभ्य: कयोश्चिद् द्वयो: ससन्दर्भव्याख्या विधेया ।** **( ०८ )**

*(१) नृपेक्षणं सर्वकृतिश्च सङ्गर: शास्त्रं विवाहो गमदीक्षणे रवे: ।*
*वीर्येऽथ ताराबलता: शुभौ विधुर्विधोर्बलेऽर्कोऽर्कबले कुजादय: ॥*

*(२) सूर्यारसौम्यास्फुजितोऽक्षनागसप्ताद्रिघस्रान् विधुरग्निनाडी: ।*
*तमोयमेज्यास्त्रिरसाऽश्विमासान् गन्तव्यराशे: फलदा: पुरस्तात् ॥*

*(३) तज्जातकर्मादि शिशोर्विधेयं पर्वाख्यरिक्तोनतिथौ शुभेऽह्नि ।*
*एकादशे द्वादशकेऽपि घस्रे मृदुध्रुवक्षिप्रचरोडुषु स्यात् ॥*

**प्रश्न: ६ कस्याप्येकस्योपरि यथाग्रन्थं स्वमतं प्रदर्शयत ।** **( ०८ )**

*(१) सङ्क्रान्तिकालनिर्णय: । (२) व्रतबन्धे वर्णेशशाखेशयो: प्रयोजनम् ।*

**प्रश्नः ७ टिप्पणीं लिखत । ( द्वयोरेव )** **( ०४ )**

*(१) सङ्क्रान्तेः शुभाशुभफलम् (२) ताराबलम् (३) व्रतबन्धे गुरुबलविचारः*

*(४) भूम्युपवेशनं जीविकापरीक्षा च*

**प्रश्नः ८ पञ्चानां प्रश्नानामतिलघूत्तराणि लिखितव्यानि ।** **( ०५ )**

*(१) 'खराम' नाम का सङ्ख्या ? (२) विष्णुपदं नाम किम् ?*

*(३) वज्रं कस्य ग्रहस्य रत्नमस्ति ? (४) राश्यादौ कत्यंशपर्यन्तं सूर्यभौमफलं प्रयच्छतः ? (५) केषु वर्षेषु चौलसंस्कारः शस्तः ?*

*(६) कानि लघुसंज्ञकनक्षत्राणि सन्ति ? (७) शुचिः नाम कः मासः ?*

## तृतीयान्वितिः

**प्रश्नः ९ अधोलिखितेभ्यः कयोश्चिद् द्वयोः ससन्दर्भव्याख्या विधेया ।** **( ०८ )**

*(१) राश्यैक्ये चेद्भिन्नमृक्षं द्वयोः स्यान्नक्षत्रैक्ये राशियुग्मं तथैव ।*
*नाडीदोषो नो गणानां च दोषो नक्षत्रैक्ये पादभेदे शुभं स्यात् ॥*

*(२) ज्येष्ठे पतिज्येष्ठमथाधिके पतिं हन्त्यादिमे भर्तृगृहे वधूः शुचौ ।*
*श्वश्रूं सहस्ये श्वसुरं क्षये तनुं तातं मधौ तातगृहे विवाहतः ॥*

*(३) नगरप्रवेशविषयादुपद्रवे करपीडने विबुधतीर्थयात्रयोः ।*
*नृपपीडने नववधूप्रवेशने प्रतिभार्गवो भवति दोषकृन्नहि ॥*

**प्रश्नः १० सशास्त्रमतं प्रश्नं चर्चयत । ( द्वयोरेव )** **( ०८ )**

*(१) विवाहदोषाणां परिहारः*

*(२) वधूप्रवेशद्विरागमनयोः भेदः प्राचीनार्वाचीनसमयानुसारेण*

*(३) वधूप्रवेशमुहूर्तः*

**प्रश्नः ११ टिप्पणी कार्या । ( द्वयोरेव )** **( ०४ )**

*(१) विवाहभङ्गयोगः परिहारश्च (२) विवाहमुहूर्ते वधूवरयोः चन्द्रादिग्रहबलम्*

*(३) विवाहानन्तरं वध्वाः पित्रादिगृहनिवासफलम् (४) द्विरागमने सम्मुखशुक्रदोषः*

**प्रश्नः १२ पञ्चानां प्रश्नानामतिलघूत्तराणि लिखितव्यानि ।** **( ०५ )**

*(१) विवाहे कन्यावरयोः केषां दशकूटानां विचारो भवति ?*

*(२) त्रिज्येष्ठं नाम किम् ?*

*(३) गणकूटस्य कति गुणाः भवन्ति ?*

*(४) केषु दिनादिषु वधूप्रवेशः शस्तः ?*

*(५) केषु गोत्रेषु सम्मुखशुक्रदोषो न भवति ?*

*(६) पातदोषः कदा भवति ?*

*(७) वधूप्रवेशे कति वर्षानन्तरं वधूप्रवेशमुहूर्तस्यावश्यकता न भवति ?*

--००--